मेधो यथा। शङ्खलिखितौ। नेष्टकार्च्चिते पितॄन् सन्तर्पयेत्। इति श्राद्धतत्त्वम्॥*॥ देवोद्देशकेष्ट-कामयष्टकदानफलं यथा। मठादिप्रतिष्ठातत्त्वे॥

"मृण्मयात् कोटिगुणितं फलं स्यात् दारुभिः कृते।
कोटिकोटिगणं पुण्यफलं स्यादिष्टकामये॥
द्विपरार्द्धगुणं पुण्यं शैलजे तु विदुर्बुधाः।
म्लेच्छलयोः समं ज्ञेयं फलमाढ्यदरिद्रयोः"॥

इष्टकापथं, क्ली, (इष्टं कापथं यस्य अधोवायुकरत्वात्।) वीरणमूलम्। इत्यमरः॥ (इष्टकाभिर्निर्म्मितः पन्थाः।) इष्टकानिर्म्मितपथे, पुं॥

इष्टगन्धं, क्ली, (इष्टो गन्धो यस्येति।) बालुका। इति मेदिनी॥

इष्टगन्धः, त्रि, (इष्टो गन्धो यस्य।) सुगन्धिद्रव्यम्। इत्यमरः॥ (इष्टश्चासौ गन्धश्चेति वाक्ये। सौरभम्।)

इष्टा, स्त्री, (इज्यतेऽनया। यज + क्त टाप्।) शमीवृक्षः। इति राजनिर्घण्टः॥

इष्टापूर्त्तं, क्ली, (इष्टञ्च पूर्त्तञ्च द्वयोः समाहारः।) यज्ञखातादिकर्म्म। इति हेमचन्द्रः॥ यथा।

"अग्निहोत्रं तपः सत्यं वेदानाञ्चानुपालनम्।
आतिथ्यं वैश्वदेवञ्च इष्टमित्यभिधीयते॥
वापीकूपतड़ागादिदेवतायतनानि च।
अन्नप्रदानमारामाः पूर्त्तमित्यभिधीयते"॥

इति मलमासतत्त्वधृतजातूकर्णः॥ (यथा, मार्कण्डेयपुराणे १८।६।

"इष्टापूर्त्तविनाशाय तद्राजश्चौरधर्म्मिणः"॥

तथा च महाभारते। ३। ३२। ३०।

"इष्टापूर्त्तफलं न स्यात् न शिष्यो न गुरुर्भवेत्"।)

इष्टार्थोद्युक्तः, त्रि, (इष्टोऽर्थस्तस्मिन् उद्युक्तः।) उत्सुकः। उत्साहयुक्तः। इत्यमरः॥

इष्टिः, स्त्री, (इष्, यज् वा + क्तिन्।) अभिलाषः। (इति भाष्यकारेष्ट्या गतार्थत्वात्। इति पाणिनिः।) यागः। इत्यमरः॥ (यथा, रघुः।१०।४।

"आरेभिरे जितात्मानः पुत्त्रीयामिष्टिमृत्विजः"।

"प्राजापत्यं निरूप्येष्टिं सर्व्ववेदसदक्षिणां"।

इति मनुः।६।३८।) श्लोकसंग्रहः। इति मेदिनी॥

इष्टिकापथिकं, क्ली, लामज्जकतृणम्। इति राजनिर्घण्टः॥

इष्टिपचः, पुं, (इष्टिं यज्ञं पचतीति। यद्वा, इष्टये स्वेच्छार्थं पचति यः। इष्टि + पच + अच्।) दनुजः। असुरः। इति शब्दरत्नावली॥

इष्टिमुट्, [ष्] पुं, (इष्टिं यागं मुष्णाति। इष्टि + मुष् + क्विप्।) दैत्यः। इति त्रिकाण्डशेषः॥

इष्णुः, स्त्री, (इष + नु।) इच्छा। इत्युणादिकोषः॥

इष्मः, पुं, (इच्छतीति इषियुधीति मक्।) कामदेवः। वसन्तकालः। इति सिद्धान्तकौमुद्यामुणादिवृत्तिः॥ [कालः। इति हेमचन्द्रः॥

इष्यः, पुं, (इष्यतेऽनेन इति। इष् + क्यप्।) वसन्त-

इष्वः, पुं, (इष्यतेऽसौ। इष् + वन्। निपातनात् गुणाभावः।) उपदेष्टा। इत्युणादिकोषः॥

इष्वासं, त्रि, (इषून् बाणान् अस्यतीति। इषु + अस् + घञ्।) इषुक्षेपकम्। इति मेदिनी॥ तिरन्दाज इति ख्यातम्।

इष्वासः, पुं, (इषवो बाणा अस्यन्ते क्षिप्यन्तेऽनेन। इषु + अस् + करणे घञ्।) धनुः। इत्यमरः॥ ("महोरस्को महेष्वासो गूढ़जत्रुररिन्दमः"। इति रामायणे। १। १। १०। गीतायां १।४।

"अत्र शूरा महेष्वासा भीमार्ज्जुनसमा युधि"।)

इह, व्य, (अस्मिन् काले, लोके, विषये, देशे, दिशि वा इत्याद्यर्थे निपातनात् सिद्धम्।) अस्मिन्। एइ देशे एइ काले इत्यादि भाषा। इति व्याकरणम्॥ (यथा, मनुः।३।१८१।

"यत्तु वाणिजके दत्तं नेह नामुत्र तद्भवेत्"।

"षड़् दोषाः पुरुषेणेह हातव्या भूतिमिच्छता"।

इति हितोपदेशे।)

इहामुत्रफलभोगविरागः, पुं, (इह अस्मिन् लोके स्रक्चन्दनादिजनितोऽमुत्रामुष्मिन् लोके अमृतादिविषयोत्पन्नो योऽनित्यः फलभोगस्तस्मात् विरागो नितरां विरतिः।) ऐहिकपारत्रिकविषयभोगेभ्यो नितरां विरतिः इति वेदान्तसारे॥

ई

ई दीर्घ ईकारः। चतुर्थस्वरवर्णः। अस्योच्चारणस्थानं तालु। (स च दीर्घः द्विमात्रत्वात् त्रिमात्राश्रयत्वात् प्लुतश्च भवति।) (विस्तृतिस्तु ह्रस्वइकारे द्रष्टव्या।)

"ईकारं परमेशानि स्वयं परमकुण्डली।
ब्रह्मविष्णुमयं वर्णं तथा रुद्रमयं सदा॥
पञ्चदेवमयं वर्णं पीतविद्युल्लताकृतिम्।
चतुर्ज्ञानमयं वर्णं पञ्चप्राणमयं सदा"॥

इति कामधेनुतन्त्रम्। (वङ्गीयभाषायां।) तस्य लेखनप्रकारो यथा।

"ऊर्द्ध्वाधःकुञ्चिता मध्ये त्रिकोणाधोगता पुनः।
अधोगता कोणशीर्षा कुञ्चिता दक्षतः शुभा॥
शीर्षाद्दक्षे कोणयुता कुञ्चितोर्द्ध्वगता पुनः।
चन्द्रसूर्य्याग्निरूपा सा मात्राशक्तिः प्रकीर्त्तिता"॥

इति वर्णोद्धारतन्त्रम्॥*॥ अस्य नामानि यथा,—

"ई स्त्रीमूर्त्तिर्म्महामाया लोलाक्षी वामलोचनम्।
गोविन्दः शेखरः पुष्टिः सुभद्रा रतिसंज्ञकः॥
विष्णुर्लक्ष्मीः प्रहासश्च वाग्विशुद्धः परापरः।
कालोत्तरीयो भेरुण्डा रतिश्च पौण्ड्रवर्द्धनः॥
शिवोत्तमः शिवा तुष्टिश्चतुर्थी विन्दुमालिनी।
वैष्णवी वैन्दवी जिह्वा कामकला सनादका॥
पावकः कोटरः कीर्त्तिर्मोहनी कालकारिका।
कुचद्वन्द्वं तर्ज्जनी च शान्तिस्त्रिपुरसुन्दरी"॥

इति तन्त्रोक्तवर्णाभिधानम्॥ (मातृकान्यासेऽस्य वामचक्षुषि स्थानम्। यथा, मातृकान्यासधृतमन्त्रे। "इं नमो दक्षिणचक्षुषि ईं नमो वामचक्षुषि।)

ई, ल, कान्तौ। गतौ। व्याप्तौ। क्षेपे। प्रजने। खादने। इति कविकल्पद्रुमः॥ (अदां-परं-सकं-अकं च-अनिट्।) कान्तिरिच्छा। प्रजनो गर्भग्रहणं इत्यर्थः। ल एति गौः गर्भं गृह्णाति इत्यर्थः। "न हि तरणिरुदीते दिक् पराधीनवृत्तिः"। इति गणकृता नित्यत्वादात्मनेपदं। धातुरयं कैश्चिन्न मन्यते। इति दुर्गादासः॥

ई, ङ य, गतौ। इति कविकल्पद्रुमः॥ (दिवां-आत्मं-सकं-अनिट्।) ङ य ईयते। इति दुर्गादासः॥

ई, व्य विषादः। अनुकम्पा। इति मेदिनी॥ क्रोधः। दुःखभावनं। प्रत्यक्षं। सन्निधिः। इति हेमचन्द्रः॥ (सम्बोधनम्।)

ईः, पुं, कन्दर्पः। इति त्रिकाण्डशेषः॥

ईः, स्त्री, (अस्य विष्णोः पत्नी। ङीप्।) लक्ष्मीः। इति त्रिश्वमेदिन्यौ॥

ईख, इ गतौ। इति कविकल्पद्रुमः॥ (इदित्-भ्वादिं-परं-सकं-सेट्।) दीर्घादिः। इ ईङ्खते। इति दुर्गादासः॥ (ईख गतौ। ईखति इति केचित्।)

ईक्ष ङ दर्शने। इति कविकल्पद्रुमः॥ (भ्वादिं-आत्मं-सकं-सेट्।) दर्शनमिह चाक्षुषज्ञानं प्रणिधानञ्च। ङ ईक्षते चन्द्रं लोकः। "न कामवृत्तिर्व्वचनीयमीक्षते"। इति कालिदासः॥ "निरीक्षिष्यामि यान्मुनीन् इति गणकृतानित्यत्वात्" इति रमानाथः॥ "वस्तुतस्तु निरीक्ष्यते निरीक्षः पचादित्वादन् ततो निरीक्ष इवाचरतीति क्वौ साध्यं" इति दुर्गादासः॥

ईक्षणं, क्ली, (ईक्ष + भावे, ल्युट्।) दर्शनम्। ("कृतान्धा धनलोभान्धाः नोपकारेक्षणक्षमाः"। इति कथासरित्सागरे॥) (ईक्ष्यतेऽनेनति करणे ल्युट्।) चक्षुः। इत्यमरः॥ ("अभिमुखे मयि संवृतमीक्षणम्"। इति शाकुन्तले। २ अङ्के।

"श्वासक्षामेक्षणा दीना सुनीतिर्वाक्यमब्रवीत्"।

इति विष्णुपुराणे।१।११।१५।) निरूपणम्। पर्य्यवेक्षणम्। यथा, मनुः ७।१४१।

'स्थापयेदासने तस्मिन् खिन्नःकार्य्येक्षणे नृणाम्"।)

ईक्षणिका, स्त्री, (ईक्षणेन हस्तरेखाद्यवलोकनेन शुभाशुभं जानाति या। ईक्षण + ठन् + टाप्।) दैवज्ञा। लक्षणादिना शुभाशुभनिरूपिणी। इत्यमरः॥ (पुं, दैवज्ञः। यथा, मनुः।६।२५८।

"मङ्गलादेशवृत्ताश्च भद्राश्चेक्षणिकैः सह"।)

ईज, इ, कुत्से। गतौ। इति कविकल्पद्रुमः॥ (भ्वादिं-आत्मं-सकं-सेट्-इदित्।) इ ईञ्जते। कुत्सः कैश्चिन्न मन्यते। इति दुर्गादासः॥

ईज, ङ, कुत्से। गतौ। इति कविकल्पद्रुमः॥ (भ्वादिं-आत्मं-सकं-सेट्।) दीर्घादिः। ङ ईञ्जते इजते। कुत्सः कैश्चिन्न मन्यते। इति दुर्गादासः॥

ईड़, क, स्तुतौ। इति कविकल्पद्रुमः॥ (चुरां-परं-सकं-सेट्।) क ईड़यति। इति दुर्गादासः॥

ईड़, ङ ल, स्तुतौ। इति कविकल्पद्रुमः॥ (अदां-आत्मं-सकं-सेट्।) ल ङ ईट्टे। इति दुर्गादासः॥ (यथा, रामायणे। ३य काण्डे।

"गन्धर्व्वाः सुरसंघाश्च बहवश्च महर्षयः।
अन्तरीक्षगतं देवं गीर्भिरग्र्याभिरीड़िरे"॥)

ईड़ा, स्त्री, (ईड़ + क + टाप्।) स्तुतिः। इति हलायुधः॥ (प्रशंसा।)

ईड़ितः, त्रि, (ईड्यते स्म। ईड़् + क्त।) स्तुतः। कृतस्तवः। इत्यमरः॥ (प्रशंसितः।)